# 6. कालिदासः



छात्राः – नमस्ते आचार्यवर्य!

अध्यापकः – प्रिय-छात्राः । मङ्गलानि भवन्तु। उपविशत। पश्यन्तु इदं चित्रं।

सर्वे – पश्यामः गुरुवर्य!

अध्यापकः – चित्रे किं पश्यथ? सुरेश, त्वं कथय।

सुरेशः – एतत् भारतस्य मानचित्रम् अस्ति।

अध्यापकः – समीचीनम्। गिरीश, त्वं वद। चित्रे किमपि अन्यत्

पश्यसि?

गिरीशः – आम् महोदय! एकस्य महापुरुषस्य चित्रं पश्यामि। कोऽयं महापुरुषः? कृपया वदतु।

अध्यापकः – अस्य महापुरुषस्य नाम महाकविः कालिदासः ।

गणेशः – गुरुदेव! किं किं लिखितम् अनेन महापुरुषेण?

अध्यापक – समीचीनः प्रश्नः । अधः प्रदत्तं चित्रं पश्य। अत्र किं किम् अस्ति?

गणेशः – गुरुदेव! अत्र अनेकानि पुस्तकानि सन्ति।

अध्यापकः – नामानि पठित्वा कथय।

गणेशः – कुमारसम्भवम्, रघुवंशम्, मेघदूतम्, ऋतुसंहारम्, अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्।

अध्यापकः – अतिशोभनम्।

दिनेशः – आचार्य! अयं कविः कुत्र अवसत्?

अध्यापकः – वत्स दिनेश! मानचित्रं पश्य। तत्रैव लिखितम् अस्ति।

दिनेशः – पश्यामि गुरो! 'उज्जयिनी' इति लिखितम्।

अध्यापकः – शोभनम्। उज्जयिनी एव एतस्य महाकवेः जन्मस्थानम्। तत्रैव अवसत् सः। भुवनेश! त्वं वद, उज्जयिनी कस्मिन् प्रदेशे अस्ति?

भुवनेशः – आचार्य! मध्यप्रदेशे अस्ति इति।

अध्यापकः – समीचीनम्।

प्रिय-छात्राः! ध्यानेन शृणुत। एतेषु पुस्तकेषु भारतीय-संस्कृतिः वर्णिता। अयं कविः कालिदासः राजा भोजस्य सभायाम् आसीत्। राजा भोज : कालिदासस्य परमं मित्रम् आसीत्। अयं संस्कृतसाहित्यस्य भारतदेशस्य च रत्नम् अस्ति।

# अनुशीलनम्

## 1. आम् अथवा न इति लिखत।

| | *उत्तराणि* |
|---|---|
| (i) किम् अस्मिन् पाठे भारतस्य मानचित्रं प्रदर्शितम्? | ................ |
| (ii) किं मानचित्रे अन्यस्य कस्यापि चित्रम् अस्ति? | ................ |
| (iii) किम् इदं चित्रं महाकवेः कालिदासस्य अस्ति? | ................ |
| (iv) किम् अभिज्ञानशाकुन्तलम् इति नाटकस्य लेखकः महाकविः कालिदासः? | ................ |
| (v) किं रघुवंशमहाकाव्यम् अपि महाकविना कालिदासेन लिखितम्? | ................ |

## 2. अधोलिखित-प्रश्नानाम् उत्तराणि एकेन-पदेन लिखत।

| | |
|---|---|
| (i) अस्माकं देशस्य महाकविः कः? | ................ |
| (ii) कालिदासः कुत्र अवसत्? | ................ |
| (iii) महाकविः कालिदासः कुत्र अवसत्? | ................ |

(iv) ''मेघदूतम्'' नाम गीतिकाव्यं केन लिखितम्? .......
.........

3. **रेखाङ्कित-पदम् आधृत्य प्रश्ननिर्माणं कुरुत।**

(i) <u>भारतस्य</u> मानचित्रम्।

(ii) अयं <u>महाकविः</u> अस्ति।

(iii) चित्रे <u>सप्त</u> पुस्तकानि सन्ति।

(iv) कालिदासः <u>उज्जयिन्याम्</u> अवसत्।

(v) <u>कालिदासः</u> साहित्यमालायाः रत्नम् अस्ति।

4. **एकेन वाक्येन उत्तराणि देयानि।**

(i) कालिदासः कस्य सभायाम् आसीत्?

(ii) कालिदासस्य मित्रं कः आसीत्?

(iii) अस्य रचनासु कस्य संस्कृतिः वर्णिता अस्ति?

(iv) कालिदासस्य जन्मस्थानं किम्?

5. **मञ्जूषायाः चित्वा द्वे पर्यायवाची पदे लिखत -**

सेवकः, शिक्षकः, भूपतिः, भृत्यः, अध्यापकः, नृपः

उत्तराणि -

1.

2.

6. **कोष्ठकगतं शुद्धं पदम् इति अनेन चिह्नेन चिह्नयत।**

1. कालिदासेन समानः न कोऽपि ..................... (आसीत्/ आसन्)

2. कालिदासः ......................... आसीत्। (महाकविः/ सामान्यकविः)

3. कालिदासः भोजस्य .................... आसीत्। (मित्रं/शत्रुः)

4. अयं कविः ............................ अवसत्। (उज्जयिनीनगरे/ दिल्लीनगरे)

**7. कालिदासेन लिखितानां पुस्तकानां नामानि लिखत।**

1. ....................
2. ....................
3. ....................
4. ....................
5. ....................
6. ....................
7. ....................